# દશાક્ષરલક્ષ્મીમન્ત્રમ્

dashAkSharalakShmImantram

sanskritdocuments.org

January 3, 2019

# dashAkSharalakShmImantram

# દશાક્ષરલક્ષ્મીમન્ત્રમ્

## Sanskrit Document Information

Text title : dashAkSharalakShmImantram

File name : dashAkSharalakShmImantram.itx

Category : devii, lakShmI, devI

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : shrIlakShmIkaTAkSha S K Rajagopalan 2001 collection of Laxmistotras

Latest update : January 3, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

January 3, 2019

*sanskritdocuments.org*

# દશાક્ષરલક્ષ્મીમન્ત્રમ્

અસ્ય શ્રીદશાક્ષરીમહામન્ત્રસ્ય -
દક્ષ ઋષિઃ - વિરાટ્ છન્દઃ - શ્રીલક્ષ્મીઃ દેવતા -
સર્વેષ્ટસિદ્ધ્યર્થે જપે વિનિયોગઃ ।
ઋષ્યાદિ ન્યાસઃ
દક્ષ ઋષયે નમઃ શિરસિ - વિરાટ્ છન્દસે નમઃ મુખે
શ્રિયૈ દેવતાયૈ નમઃ હૃદિ - વિનિયોગાય નમઃ સર્વાઙ્ગે
કરન્યાસઃ
ૐ દેવ્યૈ નમઃ અઙ્ગુષ્ટાભ્યાં નમઃ ।
ૐ પદ્મિન્યૈ નમઃ તર્જનીભ્યાં નમઃ ।
ૐ વિષ્ણુપત્ન્યૈનમઃ મધ્યમાભ્યાં નમઃ ।
ૐ વરદાયૈનમઃ અનામિકાભ્યાં નમઃ ।
ૐ કમલાયૈ નમઃ કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ કમલવાસિન્યૈ નમઃ ।
ૐ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

નેત્રહીનહૃદયાદિ પઞ્ચાઙ્ગન્યાસઃ
ૐ દેવ્યૈ નમઃ હૃદયાય નમઃ ।
ૐ પદ્મિન્યૈ નમઃ શિરસે સ્વાહા ।
ૐ વિષ્ણુપત્ન્યૈનમઃ શિખાયૈ વષટ્ ।
ૐ વરદાયૈ નમઃ કવચાય હું ।
ૐ કમલવાસિન્યૈ નમઃ અસ્ત્રાય ફટ્ ।
ૐ ભૂર્ભુવસ્સુવરોમિતિ દિગ્બન્ધઃ ॥

ધ્યાનમ્ ।
આસીના સરસીરુહે સ્મિતમુખી હસ્તામ્બુજૈર્બિભ્રતિ
    દાનં પદ્મયુગાભયે ચ વપુષા સૌદામિનીસન્નિભા ।
મુક્તાહારવિરાજમાનપૃથુલોત્તુઙ્ગસ્તનોદ્ભાસિની

પાયાદ્ધઃ કમલા કટાક્ષવિભવૈરાનન્દયન્તી હરિમ્ ॥

(એવં ધ્યાત્વા પીઠશક્તિભિઃ પીઠપૂજાં કૃત્વા સ્વર્ણાદિ નિર્મિતં યન્ત્રં
અસ્ત્રમન્ત્રેણ આસનં દત્વા પીઠમધ્યે સંસ્થાપ્ય પુનર્ધ્યાત્વા
મૂલેન મૂર્તિં પ્રકલ્પ્ય, આવાહનાદિ પુષ્પાક્ષતૈઃ ઉપચારૈઃ સમ્પૂજ્ય
દેવ્યાજ્ઞાં ગૃહીત્વા આવરણપૂજાં કુર્યાત્ ।)

ષટ્કોણ કેસરેષુ -
આગ્નેયકોણે ૐ દેવ્યૈ નમઃ હૃદયાય નમઃ ।
નિરૃતિકોણે ૐ પદ્મિન્યૈ નમઃ શિરસે સ્વાહા ।
વાયવ્યકોણે ૐ વિષ્ણુપત્ન્યૈ નમઃ શિખાયૈ વષટ્ ।
ઈશાન્યકોણે ૐ વરદાયૈ નમઃ કવચાય હું ।
દેવી પશ્ચિમે કોણે ૐ કમલવાસિન્યૈ નમઃ અસ્ત્રાય ફટ્ ।
ઇતિ પઞ્ચાઙ્ગાનિ પૂજયેત્ તતઃ પુષ્પાઞ્જલિં આદાય મૂલમન્ત્રં ઉચ્ચાર્ય,
ૐ અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલે ।
ભક્ત્યા સમર્પયે તુભ્યં પ્રથમાવરણાર્ચનમ્ ॥

ઇતિ પુષ્પાઞ્જલિં વિકીર્ય વિશેષાર્ઘ્યાત્ બિન્દું નિક્ષિપ્ય પૂજિતાઃ તર્પિતાઃ સન્તુ
ઇતિ વદેત્ - તતઃ અષ્ટદલપદ્મેષુ -
પૂર્વે ૐ બલાક્યૈ નમઃ ।
આગ્નેયે ૐ વિમલાયૈ નમઃ ।
દક્ષિણે ૐ કમલાયૈ નમઃ ।
નૈરૃત્યે ૐ વિભીષિકાયૈ નમઃ ।
પશ્ચિમે ૐ માલિકાયૈ નમઃ ।
વાયવ્યે ૐ શાઙ્કર્યૈ નમઃ ।
ઉદીચ્યાં ૐ વસુમાલિકાયૈ નમઃ ।
ઈશાન્યે ૐ વનમાલિકાયૈ નમઃ ।
ઇતિ ભક્ત્યા પૂજયિત્વા પુષ્પાઞ્જલિં ગૃહીત્વા,
ૐ અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલે ।
ભક્ત્યા સમર્પયે તુભ્યં દ્વિતીયાવરણાર્ચનમ્ ॥

તતઃ ભૂપુરે ક્રમેણ -
પૂર્વે ૐ વં વજ્રાય નમઃ ૐ ઇન્દ્રાય નમઃ ।
આગ્નેયે ૐ શં શક્તયે નમઃ ૐ અગ્નયે નમઃ ।

દક્ષિણે ૐ દં દણ્ડાય નમઃ ૐ યમાય નમઃ ।
નૈરૃત્યે ૐ ખં ખડ્ગાય નમઃ ૐ નિરૃતયે નમઃ ।
પશ્ચિમે ૐ પં પાશાય નમઃ ૐ વરુણાય નમઃ ।
વાયવ્યે ૐ અં અઙ્કુશાય નમ ૐ વાયવે નમઃ ।
ઉત્તરે ૐ ગં ગદાયૈ નમઃ ૐ કુબેરાય નમઃ ।
ઈશાન્યે ૐ ત્રિં ત્રિશૂલાય નમઃ ૐ ઈશાનાય નમઃ ।
(ઇતિ ભક્ત્યા પૂજાં કૃત્વા ધૂપાદિ નીરાજનાનન્તરં પૂજ્ય
હસ્તે પુષ્પાઞ્જલિં ગૃહીત્વા -)
ૐ અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલે ।
ભક્ત્યા સમર્પયે તુભ્યં તૃતીયાવરણાર્ચનમ્ ॥

અથ દશાક્ષરલક્ષ્મી મન્ત્રઃ ।

ૐ નમઃ કમલવાસિન્યૈ સ્વાહા ।

જપપ્રકારઃ
દશલક્ષં જપેન્મન્ત્રં મન્ત્રવિદ્વિજિતેન્દ્રિયઃ ।
દશાંશં જુહુયાન્મન્ત્રી મધુનાઽઽક્તૈઃ સરોરુહૈઃ ॥

ઇતિ સમ્પૂજયેદ્દેવીં સમ્પદામાલયં ભવેત્ ।
સમુદ્રકન્યાં સરિતિ કણ્ઠમાત્રે જલે સ્થિતઃ ॥

ત્રિલક્ષં પ્રજપેન્મન્ત્રી સાક્ષાદ્વૈશ્રવણો ભવેત્ ।
આરાધ્યોત્તરનક્ષત્રે દેવીં સ્રક્ચન્દનાદિભિઃ ॥

નન્દ્યાવર્ત્તભવૈઃ પુષ્પૈઃ સહસ્રં જુહુયાત્તતઃ ।
પૂર્ણમાસ્યાં ફલૈઃ ચિત્રૈઃ જુહુયાન્મધુરાપ્લુતૈઃ ॥

પઞ્ચમ્યાં વિશદામ્ભોજૈઃ શુક્રવારે સુગન્ધિભિઃ ।
અન્ચૈર્વા વિશદૈઃ પુષ્પૈઃ પ્રતિમાસં ફલાવતીઃ ॥

સ ભવેદબ્દમાત્રેણ સર્વદા સમ્પદાં નિધિઃ ॥

ઇતિ દશાક્ષરલક્ષ્મીમન્ત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*dashAkSharalakShmImantram*

pdf was typeset on January 3, 2019

Please send corrections to *sanskrit@cheerful.com*